ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ ಕ್ರಮ ಸಂಖ್ಯೆ :

**Q.P. Sl. No. :**

ಮಾರ್ಚ್/ಏಪ್ರಿಲ್ **2026** ರ ಪರೀಕ್ಷೆ-1

**MARCH/APRIL 2026 EXAMINATION-1**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]

Total No. of Printed Pages : 12 ]

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]

Total No. of Questions : 45 ]

# A

**CCE RF/RR/ PF/PR**

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S** **Code No. : 16-S**

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ

## Subject : First Language — SANSKRIT

## प्रथमभाषा — संस्कृतम्

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ)**

**(Regular Fresh / Regular Repeater / Private Fresh / Private Repeater)**

ದಿನಾಂಕ : 18. 03. 2026 ] [ Date : 18. 03. 2026

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-00 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-15 ರವರೆಗೆ ] [ Time : 10-00 A.M. to 1-15 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ**

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣದ ಗುರುತನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचना:***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत (बाणचिह्नम् अनुसरत) । प्रश्नपत्रमुद्घाटयितुं वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

Tear here/इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER WITH REVERSE JACKET**
**विपरीतेन आवरणेन सह प्रश्नपत्रमुद्घाटयितुमितः कर्तयत**

Tear here/इतः कर्तयत

16-S 10/809

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'भास्करः' अस्य समानार्थकपदम् इदं भवति ।

   (A) सूर्यः (B) मकरः

   (C) भार्याः (D) तस्करः

2. 'अनामयः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) तन्मयः (B) चिन्मयः

   (C) करुणामयः (D) आमयः

3. 'महोदयः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) महोदयी (B) महोदया

   (C) महदायिनी (D) महोदरः

4. 'दृश्यते' अत्र एषः लकारः वर्तते ।

   (A) लृट् लकारः (B) लङ् लकारः

   (C) लट् लकारः (D) लोट् लकारः



16-S 10/809

5. 'जगत्याम्' अत्र एषा विभक्तिः वर्तते ।

(A) सप्तमीविभक्तिः (B) तृतीयाविभक्तिः

(C) प्रथमाविभक्तिः (D) षष्ठीविभक्तिः

6. चन्द्रस्य <u>शुक्लपक्षे</u> वृद्धिः सम्भवति । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) किमर्थम् (B) कदा

(C) कुत्र (D) केषाम्

**II. <u>चतुर्थं पदं लिखत ।</u>** **4 × 1 = 4**

7. वृत्रासुरः – असुरः :: दधीचिः – .................... ।

8. कीर्तिकायः – शिवाजिप्रभुः :: अभयदायिनी – .................... ।

9. शचीपतिः – इन्द्रः :: अञ्जनापतिः – .................... ।

10. सुरुचिः – उत्तमः :: सुनीतिः – .................... ।



16-S 10/809

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. कः भूमिं परितः प्रदक्षिणं करोति ?

12. लोके सदा किं शाम्यतु ?

13. राजा कान् आचख्यौ ?

14. केसरी कुत्र राज्यं पालयति स्म ?

15. नाट्ये कति रसाः स्मृताः ?

16. दुःखितः ध्रुवः कस्याः समीपम् अगच्छत् ?

17. रमणमहर्षेः कस्मिन् विषये अनास्था आसीत् ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. बुद्धिसागरः मुञ्जं किं प्राह ?

19. कः आयुर्वेदः उच्यते ?

20. सतां सङ्गः किं किं करोति ?

21. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

**अथवा**

मन्थरा कस्याः हृदयं निर्ममन्थ ? तृषितः चकोरः कम् आश्रयति ?

16-S 10/809

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) यतिस्सः ।

b) धेनुर्गच्छति ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाक्रमम् ।

b) चक्रपाणिः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) दिनं दिनं प्रति =

b) पतितानि फलानि यस्मात् सः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) पठते बालकाय लेखनीं यच्छतु ।

b) माता क्षीरम् आनीतवती ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकः पाठं पठति ।

b) पित्रा कार्यालयः गम्यते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಪ್ರತಿ ವರ್ಷವೂ ನಾವು ಜನ್ಮದಿನೋತ್ಸವವನ್ನು ಆಚರಿಸೋಣ. ಆ ದಿನ ದೇವಾಲಯಕ್ಕೆ ಹೋಗಿ ದೇವರನ್ನು ನಮಸ್ಕರಿಸಿ ಪ್ರಸಾದವನ್ನು ಸ್ವೀಕರಿಸಿ ಬರೋಣ.

Every year we celebrate our birthday. On that day by visiting temple, seek his blessings then turn up with this offerings.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. उद्योगं पुरुषलक्षणम् । उद्योगेनैव सर्वाणि कार्याणि फलन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. ‘‘याचको भूत्वा अत्र अहम् आगतः ।’’

कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

29. ‘‘संस्कृतेनैव संस्कृतिरपि सुरक्षिता ।’’

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

30. ''किंस्वित् श्रेष्ठतरं भवेत्'' ?

कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

31. ''शरणागतरक्षणं धर्म इति अस्माकं श्रद्धा ।''

कः पाठः ? का अवदत् ? शरणागतः कः ?

**अथवा**

''सागर इव तिष्ठतु ते यशः ।''

कः पाठः ? कः अवदत् ? कस्य यशः ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. भासः ।

33. वेदव्यासः ।

**अथवा**

बल्लाळसेनः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. एकोदेवः सर्वभूतेषु गूढः

सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः

साक्षी चेता केवलो निर्गुणश्च ।।



16-S 10/809

35. यत्र कुत्र वा वयं समग्रभारते स्थिता

भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।

आदितश्च मध्यतस्तथान्ततश्च भारता

भारतीयभावनेति वृद्धिमेतु भारते ।।

36. एषः मातुर्वियोगाच्च क्षुधया च भृशार्दितः ।

रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ।।

**अथवा**

आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा ।

चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. कमलमिव चारु वदनम् ।

**अथवा**

गङ्गा गङ्गेव पावनी ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. मनीषिणः सन्ति न ते हितैषिणः ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. पिबन्ति ........................................................................

........................................................................ ।

........................................................................

........................................................................ विभूतिः ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत ।

41. 'नाट्यांशः' इति पद्यपाठस्य विषयं श्लोकानुसारं लिखत ।

**अथवा**

कर्ण–शक्रयोः सम्भाषणं लिखत ।

42. अमरनाथगुहा विषये का पुराणकथा प्रसिद्धा ?



16-S 10/809

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** 1 × 4 = 4

43. डा० राधाकृष्णन् महाभागः क्रि.श. १८८८ (1888) तमे वर्षे सप्टेम्बर् मासे पञ्चमे दिने अजायत । आन्ध्रप्रदेशस्य चित्तूरुमण्डले विद्यमानः तिरुत्तणि ग्रामः अस्य जन्मस्थानम् । अस्य पिता सर्वपल्ली वीरस्वामी । माता सीतम्मा । वीरस्वामी तु मण्डलाधिकारिणः कार्यालये कर्मकरः आसीत् । राधाकृष्णन् महोदयस्य प्राथमिकविद्याभ्यासः तिरुत्तणिग्रामे आला-राम्-शालायां पञ्चमे वयसि आरब्धः । भारतीय-विद्यया संस्कृत्या च प्रभावितः सः बाल्यादेव संस्कृत भाषां श्रद्धया अध्येतुम् आरेभे । तदनन्तरं पिता पुत्रम् आङ्गलभाषाध्ययनार्थं तिरुपति नगरे विद्यमानां लुथेरन् प्रौढशालां प्रति प्रेषयामास । वेल्लूरुनगरे वोरास्विद्यालये पदवीपूर्व विद्याभ्यासं अपूरयत् । गुरुजनाः तं मेधावी छात्रः इति प्रशंसन्ति स्म । ततः मद्रासनगरे क्रैस्तमहाविद्यालये पदवी विद्याभ्यासार्थं प्रवेशम् अलभत । शिवकामम्मा-नाम्न्या कन्यया सह राधाकृष्णन् महोदयस्य विवाहः समभवत् ।

**प्रश्नाः**

i) डा० राधाकृष्णन् महाभागः कदा अजायत ?

ii) अस्य माता-पितरौ कौ ?

iii) पिता पुत्रम् आङ्गलभाषाध्ययनार्थं कुत्र प्रेषयामास ?

iv) कया सह राधाकृष्णन् महोदयस्य विवाहः समभवत् ?



16-S 10/809

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. बेङ्गलूरुमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

बेलगाविमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा धनं प्रेषयितुं शिरसिनगरे विद्यमानं पितरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसरमालिन्यम् संरक्षणोपायाः च ।

**अथवा**

स्वातन्त्र्योत्सवः ।

16-S 10/809

DO NOT WRITE ANYTHING HERE